Sem4 (ग)

* दुह्याच् - पच् - दण्ड् - रुधि - प्रच्छि - चि-
ब्रूशासुजिमन्थमुषाम् ।
कर्मयुक् स्यादकथितं तथा स्यान्नी - हृ
कृष् - वहाम् ॥

⇒ ' दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां कर्मणा यद् युज्यते तदेव अकथितं कर्म इति परिगणनं कर्तव्यमित्यर्थः ।

दुह् :- गां दोग्धि पयः । अत्र अपादान कारकं प्रबाध्य 'गाम्' इत्यत्र कर्मसंज्ञा भवति ।

याच :- ' बलिं याचते वसुधाम् ' । अत्र अपादान कारकं प्रबाध्य 'बलिम्' इत्यत्र कर्मसंज्ञा भवति ।
'अविनीतं विनयं याचते' ... अविनीतम्'

पच :- 'तण्डुलानोदनं पचति' । अत्र करण कारकं 'प्रबाध्य ' तण्डुलान्' इत्यत्र कर्मसंज्ञा भवति ।

दण्ड् :- 'गर्गान् शतं दण्डयति' । अत्र अपादान कारकं प्रबाध्य 'तण्डुलान' इत्यत्र कर्मसंज्ञा भवति ।

रुध् :- 'व्रजमवरुणद्धि गाम्' । अत्र अधिकरण कारकं प्रबाध्य 'व्रजम्' इत्यत्र कर्मसंज्ञा भवति ।

प्रच्छ् :- 'मानवकं पन्थानं पृच्छति' । अत्र अपादान कारकं प्रबाध्य 'मानवकम्' इत्यत्र कर्मसंज्ञा भवति ।

चि :- 'वृक्षमवचिनोति फलानि' । अत्र अपादान कारकं प्रबाध्य 'वृक्षम्' इत्यत्र कर्मसंज्ञा भवति ।

ब्रू :- 'माणवकं धर्मं ब्रूते' । अत्र सम्प्रदान कारकं प्रबाध्य मानवकम् इत्यत्र कर्मसंज्ञा भवति ।

शास् :- 'माणवकं धर्मं शास्ति' । अत्र सम्प्रदान कारकं प्रबाध्य माणवकम् इत्यत्र कर्मसंज्ञा भवति ।

Scanned with CamScanner

जि :- 'शतं जयति देवदत्तम्',
अत्र अपादान कारकं प्रबाध्य
'देवदत्तम्' इत्यत्र कर्मसंज्ञा भवति।

मन्थ : 'सुधां क्षीरनिधिं मथनाति'
अत्र सम्प्रदान कारकं प्रबाध्य
'सुधाम्' इत्यत्र कर्मसंज्ञा भवति।

मुष :- 'देवदत्तं शतं मुष्णाति',
अत्र अपादान कारकं प्रबाध्य
देवदत्तम इत्यत्र कर्मसंज्ञा भवति।

नी :- 'ग्राममजां नयति'। अत्र
अधिकरण कारकं प्रबाध्य 'ग्रामम्'
इत्यत्र कर्मसंज्ञा भवति।

हृ :- 'ग्राममजां हरति'। अत्र अधिकरण
कारकं प्रबाध्य 'ग्रामम्' इत्यत्र
कर्मसंज्ञा भवति।

कृष :- 'ग्राममजां कर्षति', अत्र
अधिकरण कारकं प्रबाध्य 'ग्रामम्'
इत्यत्र कर्मसंज्ञा भवति।

Scanned with CamScanner

वहः - 'ग्राममजां वहति'। अत्र
अधिकरण कारकं प्रबाध्य 'ग्रामम्'
इत्यत्र कर्मसंज्ञा भवति।

Scanned with CamScanner